# Chitraketukritam Ananta Stotram

# ચિત્રકેતુકૃતં અનન્તસ્તોત્રમ્

## Document Information

Text title : Chitraketukritam Ananta Stotram

File name : chitraketukRRitaManantastotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 6/16/34-48||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# ચિત્રકેતુકૃતં અનન્તસ્તોત્રમ્

(શેષનાગ)

ચિત્રકેતુરુવાચ ।

અજિત જિતઃ સમમતિભિઃ સાધુભિ-
ર્ભવાન્ જિતાત્મભિર્ભવતા ।
વિજિતાસ્તેઽપિ ચ ભજતામકામાત્મનાં
ય આત્મદોઽતિકરુણઃ ॥ ૩૪॥

તવ વિભવઃ ખલુ ભગવન્
જગદુદયસ્થિતિલયાદીનિ ।
વિશ્વસૃજસ્તેંઽશાંશાસ્તત્ર
મૃષા સ્પર્ધન્તે પૃથગભિમત્યા ॥ ૩૫॥

પરમાણુપરમમહતોસ્ત્વ-
માદ્યન્તાન્તરવર્તી ત્રયવિધુરઃ ।
આદાવન્તેઽપિ ચ સત્ત્વાનાં
યદ્ધ્રુવં તદેવાન્તરાલેઽપિ ॥ ૩૬॥

ક્ષિત્યાદિભિરેષ કિલાવૃતઃ
સપ્તભિર્દશગુણોત્તરૈરણ્ડકોશઃ ।
યત્ર પતત્યણુકલ્પઃ
સહાણ્ડકોટિકોટિભિસ્તદનન્તઃ ॥ ૩૭॥

વિષયતૃષો નરપશવો
ય ઉપાસતે વિભૂતીર્ન પરં ત્વામ્ ।
તેષામાશિષ ઈશ તદનુ
વિનશ્યન્તિ યથા રાજકુલમ્ ॥ ૩૮॥

કામધિયસ્ત્વયિ રચિતા
ન પરમ રોહન્તિ યથા કરમ્ભબીજાનિ ।

જ્ઞાનાત્મન્યગુણમયે
ગુણગણતોઽસ્ય દ્વન્દ્વજાલાનિ ॥ ૩૯॥

જિતમજિત તદા ભવતા
યદાહ ભાગવતં ધર્મમનવદ્યમ્ ।
નિષ્કિઞ્ચના યે મુનય આત્મારામા
યમુપાસતેઽપવર્ગાય ॥ ૪૦॥

વિષમમતિર્ન યત્ર નૃણાં
ત્વમહમિતિ મમ તવેતિ ચ યદન્યત્ર ।
વિષમધિયા રચિતો યઃ
સ હ્યવિશુદ્ધઃ ક્ષયિષ્ણુરધર્મબહુલઃ ॥ ૪૧॥

કઃ ક્ષેમો નિજપરયોઃ
કિયાનર્થઃ સ્વપરદ્રુહા ધર્મેણ ।
સ્વદ્રોહાત્તવ કોપઃ
પરસમ્પીડયા ચ તથાધર્મઃ ॥ ૪૨॥

ન વ્યભિચરતિ તવેક્ષા યયા
હ્યભિહિતો ભાગવતો ધર્મઃ ।
સ્થિરચરસત્ત્વકદમ્બેષ્વપૃથગ્ધિયો
યમુપાસતે ત્વાર્યાઃ ॥ ૪૩॥

ન હિ ભગવન્નઘટિતમિદં
ત્વદ્દર્શનાન્નૃણામખિલપાપક્ષયઃ ।
યન્નામ સકૃચ્છ્રવણાત્પુલ્કસકોઽપિ
વિમુચ્યતે સંસારાત્ ॥ ૪૪॥

અથ ભગવન્ વયમધુના
ત્વદવલોકપરિમૃષ્ટાશયમલાઃ ।
સુરઋષિણા યદુદિતં તાવકેન
કથમન્યથા ભવતિ ॥ ૪૫॥

વિદિતમનન્ત સમસ્તં તવ
જગદાત્મનો જનૈરિહાચરિતમ્ ।
વિજ્ઞાપ્યં પરમગુરોઃ કિયદિવ
સવિતુરિવ ખદ્યોતૈઃ ॥ ૪૬॥

નમસ્તુભ્યં ભગવતે સકલજગ-
ત્સ્થિતિલયોદયેશાય ।
દુરવસિતાત્મગતયે
કુયોગિનાં ભિદા પરમહંસાય ॥ ૪૭॥

યં વૈ શ્વસન્તમનુ વિશ્વસૃજઃ શ્વસન્તિ
યં ચેકિતાનમનુ ચિત્તય ઉચ્ચકન્તિ ।
ભૂમણ્ડલં સર્ષપાયતિ યસ્ય મૂર્ધ્નિ
તસ્મૈ નમો ભગવતેઽસ્તુ સહસ્રમૂર્ધ્ને ॥ ૪૮॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ષષ્ઠસ્કન્ધે ષોડશાધ્યાયાન્તર્ગતં
ચિત્રકતુકૃતં અનન્તસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૬/૧૬/૩૪-૪૮॥

bhAgavatapurANa . adhyAya 6/16/34-48..

Proofread by PSA Easwaran

*Chitraketukritam Ananta Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*